‘मनोगतम्’ – ०२.०४

‘मन की बात’ (०२.०४ कड़ी)   प्रसारणतिथि: - २९-०९-२०१९

[“मन की बात”- “मनोगतम्” - इति कार्यक्रमस्य संस्कृत-भाषिकानुवादः ]

- भाषान्तरम् -  सर्वश्री-श्रुतिकान्तपाण्डेय-नारायणदत्तमिश्र-पुरुषोत्तमशर्मभिः सम्भूय डॉ.बलदेवानन्द-सागर-द्वारा |

मम प्रियाः देशवासिनः, नमस्कारः! अद्य ‘मन की बात’- मनोगतम्-इति प्रसारणे, देशस्य महत्-व्यक्तित्व-विषये अहं संवदिष्यामि | अस्माकं सर्वेषामपि हिन्दुस्थानीयानां हृदये, तां प्रति भूरिशः सम्माननम् अस्ति, तस्याम् अतितरां प्रसक्तिः वर्तते | कदाचिदेव, कश्चन हिन्दुस्थानीयः नागरिकः भवेत्, यो हि तां प्रति आदरं नैव धारयेत्, तस्याः सम्माननं वा नैव कुर्यात् | आयुषि सा अस्मासु सर्वेषु ज्येष्ठा, तथा च, देशस्य पृथक्-पृथक्-घटनानां पृथक्-पृथक्-कालस्य च साक्षिणी अस्ति | वयं तां ‘दीदी’-इति, ‘लता-दीदी’-नाम्ना आकारयामः | सा, ऐषमः सेप्टेम्बर-मासीये अष्टाविंशतितमे दिने नवतिवर्षीया भवति | विदेशयात्रायै प्रस्थानात् प्राक्, अहं, दीदी-महाभागया साकं सम्भाषणस्य सौभाग्यम् प्राप्तवान् | इदं सम्भाषणं तादृशम् एव आसीत्, यथा, अतितरां प्रेम्णा, अनुजः भ्राता, निजाग्रजया भगिन्या सम्भाषते | अहं, एवंप्रकारकस्य वैयक्तिकस्य संवादस्य विषये, न कदाचिदपि किमपि सूचयामि, परन्तु अद्य वाञ्छामि यत्, भवन्तः अपि, लता-दीदी-महाभागायाः सम्भाषणं शृण्वन्तु | शृण्वन्तु, यत् केन प्रकारेण, आयुषः अस्मिन् क्षणेऽपि लता-दीदी, देशेन सम्बद्धानां सर्वेषामपि वृत्तानां विषयान् सम्भाषितुं उत्सुकास्ति, तत्परास्ति, तथा च जीवनस्य सन्तोषः अपि, भारतस्य प्रगतौ वर्तते, परिवर्तमाने भारते अस्ति, नूतनोच्छ्रिततां स्पृश्यमाने भारते अस्ति |

श्रीमोदी :  लतादीदी, प्रणमामि! अहं नरेंद्रमोदी वदामि |

लताजी : प्रणामः,

श्रीमोदी : अहं दूरभाषं कृतवान् यतो हि, भवत्याः जन्मदिनस्य अस्मिन् क्रमे....

लताजी :  एवम् एवम् ....

श्रीमोदी:  अहं विमानेन यात्रां विदधामि |

लताजी : शोभनम् |

मोदीजी :  तर्हि अहं विचारितवान्... प्रस्थानात् प्राक् ...

लताजी : बाढं बाढम्

मोदीजी : जन्मदिनावसरे भवत्याः कृते भूयस्यः शुभकामनाः, अग्रिमं वर्धापनं वदामि | भवत्याः स्वास्थ्यं सम्यक् स्यात्, भवत्याः आशीराशिः अस्मासु सर्वेषु सर्वदैव स्यात्, एवमेतां प्रार्थनां प्रणामञ्च कर्तुं, अहं अमेरिका-प्रस्थानात् प्रागेव भवत्यै दूरभाषम् अकरवम् |

लताजी : भवतः दूरभाषम् आगमिष्यति – इति श्रुत्वा एव अहम् अतितरां, एतावती... अभवम् | भवान्, गत्वा कदा पुनः प्रत्यागमिष्यति |

श्रीमोदी :  अहमागमिष्यामि अष्टाविंशे, रात्रौ विलम्बेन वा ऊन-त्रिंशति प्रातः, तथा च तदा भवत्या
जन्मदिनम् अभविष्यत् |

लताजी :  बाढं बाढम् | जन्मदिनं तु किम् आयोजयिष्यामः, केवलं गृहे एव सर्वे जनाः,

श्रीमोदी : दीदी, पश्यतु, मह्यं तु ...

लताजी : भवतः आशीर्वादः प्राप्येत

श्रीमोदी : अयि भो! भवत्याः आशीर्वादं वयम् अभिलषामः, भवती तु अस्मासु ज्येष्ठा...

लताजी : वयसा ज्येष्ठाः तु, अनेके जनाः भवन्ति, परन्तु निज-कर्मभिः यः ज्येष्ठः भवति, तस्य

आशीर्वादस्य प्राप्तिः नाम महती उपलब्धिः भवति |

श्रीमोदी : दीदी, भवती वयसा अपि ज्येष्ठा तथा च, कार्यैः अपि ज्येष्ठा अस्ति, भवती याम् सिद्धिं अवाप्नोत्, साधना-तपस्याभ्याम् एव|

लताजी : भद्रम्, चिन्तयामि यत् पित्रोः आशीर्वादः, तथा च श्रोतॄणां आशीर्वादः अस्ति | अहं किमपि नास्मि |

श्रीमोदीः  एवम्, एषा एव नम्रता या अस्ति, एषा अस्माकं नूतन-वंशीयानां सर्वेषां कृते, महती शिक्षा अस्ति, अस्माकं कृते महती प्रेरणा अस्ति यत् भवती जीवने एतावत् सर्वम् अनुष्ठाय अपि, स्वीय-पित्रोः संस्कारेभ्यः नम्रतायै च सर्वदैव प्राथमिकताम् अदात्|

लताजी : एवम्|

श्रीमोदी : तथा च, अहं तु प्रसन्नताम् अनुभवामि यदा भवती गर्वेण कथयति यत् जननी गुजराती आसीत् ....

लताजी : एवम्|

श्रीमोदी : तथा यदा अपि भवत्याः पार्श्वे आगच्छम्

लताजी : एवम्|

श्रीमोदी : भवती किमपि किमपि गुजराती-भोजनम् अखादयत्|

लताजी : एवम्| भवान् कः अस्ति, भवान् स्वयमपि नैव जानाति| अहं जानामि यत् भवतः आगमनेन भारतस्य चित्रं परिवर्तते, तथा च तदेव मां प्रसादयति| अतितरां भद्रम् अनुभवामि|

श्रीमोदी : एवं हि दीदी, भवत्याः आशीर्वादः सततं स्यात्, अशेष-देशस्य कृते भवत्याः आशीर्वादः भवेत्, तथा च, मादृशाः जनाः किमपि किमपि भद्रं सततं कुर्युः, मम कृते भवती सर्वदैव प्रेरणारूपा |

भवत्याः पत्रम् अपि प्राप्नोमि, तथा च, भवत्या प्रेषितम् उपहारादिकम् अपि प्राप्नुवन् अस्मि, एवं यदिदम् आत्मीयत्वं, योऽयं, कौटुम्बिक-सम्बन्धः अस्ति, तस्य कञ्चन विशिष्टम् आनन्दम् अनुभवामि|

लताजी : नूनं नूनम्| भवते नाधिकं कष्टं प्रदातुं वाञ्छामि, यतो हि पश्यामि, जानामि, यत् भवान् कियान् व्यापृतः भवति, तथा च, भवता कियन्ति कार्याणि कर्तव्यानि भवन्ति | किं किं च चिन्तनीयं भवति| यदा, भवान् गत्वा निज-मातुः चरण-स्पर्शम् अकरोत्, तदहम् अपश्यम्, तदा अहमपि कञ्चन जनं सम्प्रेष्य तस्याः आशीर्वादं स्व्यकरवम्|

श्रीमोदी : एवम्! मम जननी स्मरन्ती आसीत्, सा मां कथयन्ती आसीत्|

लताजी : एवम्|

श्रीमोदी : ओम्।

लताजी : तथा च, दूरभाषेण सा मह्यम् आशीर्वादम् अयच्छत्, तत् मह्यं अतीव अरोचत,

श्रीमोदी : अस्मदीया मातृचरणा बहु प्रसन्ना आसीत्, भवत्याः अस्य स्नेहस्य कारणात्।

लताजी : एवम् एवम्।

श्रीमोदी : तथा चाहं भवत्याः सुबहु कार्तज्ञ्यम् आवहामि यत् भवती सर्वदैव मम विषये चिन्तातुरा भवति। तथा च, पुनः एकवारम् अहं भवत्यै जन्मदिन-विषयिणीं भूयसीं शुभकामनां व्याहरामि।

लताजी : नूनम्।

श्रीमोदी : अस्मिन् क्रमे मुम्बयीम् आगच्छम् तदा मनसि दृढं भवदासीत् यत् व्यक्तिशः आगच्छेयम्।

लताजी : नूनम्, अवश्यमेव।

मोदीजी : परन्तु समयस्य एतावती व्यापृतिः आसीत् यत् अहम् आगन्तुं नैव अपारयम्।

लताजी : एवम्।

श्रीमोदी : परञ्च अहं अतिसत्वरम् आगमिष्यामि।

लताजी : एवम्।

श्रीमोदी : तथा च गृहम् आगत्य किञ्चित् गुजराती-खाद्यं भवत्याः हस्ताभ्यां खादिष्यामि।

लताजी : एवम् अवश्यम्, नूनं नूनम्। इदन्तु मम सौभाग्यं भविष्यति।

श्रीमोदी : प्रणमामि, दीदी।

लताजी : प्रणामः।

श्रीमोदी : भवत्यै बहुशः शुभकामनाः।

लताजी : कोटिशः प्रणामाः |

श्रीमोदी : प्रणमामि |

मम प्रियाः देशवासिनः, नवरात्र-पर्वणा साकमेव, अद्य-प्रभृति, उत्सवानां परिवेशः पुनरेकवारं, नवीनोल्लासेन, नूतनोर्जया, अभिनवोत्साहेन, नूतनेन च सङ्कल्पेन सम्भरिष्यति | उत्सव-कालः अस्ति, भोः! भविष्यति काले कतिपय-सप्ताह-पर्यन्तम्, अशेष-देशे, उत्सवानाम् प्रकर्षता स्थास्यति | वयं सर्वे, नवरात्र-महोत्सवम्, गरबा-नृत्यम्, दुर्गा-पूजाम्, दशहरा-दीपावालि-भ्रातृद्वितीया-छठ-पूजादीन् अनेकान् उत्सवान्, आयोजयिष्यामः | भवद्भ्यः सर्वेभ्यः, आगम्यमानानाम् उत्सवानां कृते भूयस्यः शुभकामनाः | उत्सवावसरे, कुटुम्बस्य सर्वे सदस्याः सम्भूय स्थास्यन्ति | गृहाणि आनन्द-प्रमोद-सम्भरितानि भविष्यन्ति, परञ्च, भवन्तः अवलोकयन्तः स्युः, यत्, अस्माकं परितः अपि, अनेके जनाः तादृशाः सन्ति, ये, एतेषाम् उत्सवानाम् आनन्दात् वञ्चिताः भवन्ति, तथा च एतदर्थमेव प्रोच्यते यत्– 'चिराग तले अन्धेरा'- दीपात् अधः अन्धकारः इति | कदाचित्, इदम् आभाणकम्, केवलं शब्दाः एव, नैव सन्ति, अस्माकं कृते, अन्यतमः आदेशः अस्ति, एकं दर्शनं विद्यते, एका प्रेरणा वर्तते | विचारयन्तु, एकतः कानिचन गृहाणि प्रकाशेन देदीप्यन्ते, तत्रैव, अपरतः, तत्समक्षम् एव, परिवर्तिषु केषुचित् गृहेषु, तमः आस्तीर्णः भवति | केषुचित् गृहेषु मिष्टान्नानि, अनुपयुक्तानि एव नश्यन्ति, तर्हि, केषुचित् गृहेषु, बालाः मिष्टान्नं भोक्तुं लालायन्ते | कुत्रचित् कपाटिकायां वस्त्राणि स्थापयितुं अवकाशः एव न भवति, तर्हि इतरत्र, देहावरणार्थं, काठिन्यानि अनुभूयन्ते | किम् ? एतत् 'दीपात् अधः अन्धकारः' नैव अस्ति ? – इदम् एव अस्ति- 'दीपात् अधः अन्धकारः' | एतेषाम् उत्सवानां वास्तविकः आनन्दः तदैव भवति, यदा तमः अयं निरस्तः स्यात्, अन्धकारः अयं अल्पीभवेत् – प्रकाशः च प्रसरेत् | वयं, तत्रापि प्रसन्नताः वितरेम, यत्र, अभावः अस्ति, तथा च, एतादृशः अस्माकं स्वभावः अपि स्यात् | अस्माकं गृहेषु, मिष्टान्नानां, वस्त्राणां, उपहाराणां च यदा आनयनं स्यात्, तदा पलमात्रं, तत्-प्रदान-विषये अपि विचारयेम | न्यूनात्-न्यूनम् अस्माकं गृहेषु, यस्य आधिक्यम् अस्ति, यत् वयम् इतः परं नैव युञ्जामहे, तादृश-वस्तूनि नूनम् अपरेभ्यः वितरेम | बहुषु नगरेषु, अनेकानि प्रशासनेतर-संघटनानि, बहूनां युव-मित्राणां start-ups- इति अभिनवाः लघूद्योगाः च एतानि कार्याणि कुर्वन्ति | एते, जनानां गृहेभ्यः, वस्त्राणि, मिष्टान्नानि, खाद्यपदार्थान् च सर्वान् एकत्रीकृत्य, अपेक्षवतः जनान् अन्विष्य, तेभ्यः यच्छन्ति, एवमेव च गोपनीय-रीत्या कार्याणि कुर्वन्ति | किम् अस्मिन् क्रमे, उत्सवानाम् अस्मिन् ॠतौ, पूर्ण-जागर्त्ति-सङ्कल्पाभ्यां सह, एनं 'दीपात् अधः अन्धकारम्' अपाकर्तुं शक्नुमः? बहूनां कुटुम्बानाम् आननेषु प्रफुल्लितं स्मितम्, उत्सवावसरे, भवतां

प्रसन्नतां द्विगुणीकरिष्यति, भवतां मुखानि समधिकं दीप्तिमन्ति भविष्यन्ति, भवतां दीपः, अधिकतरं प्रकाशिष्यते, भवताञ्च दीपावलिः समधिकां प्रभां धारयिष्यति|

मम प्रियाः भ्रातरो भगिन्य: च, दीपावल्यां समृद्धि-सौभाग्ययो: रूपेण लक्ष्म्या: प्रतिगृहम् आगमनं भवति। परम्परानुसारेण इदं लक्ष्म्या: स्वागतं विद्यते। किम् अस्मिन् वर्षे वयं नूतनरीत्या लक्ष्म्या: स्वागतं कर्तुं शक्नुम: ? अस्माकं संस्कृतौ पुत्री: लक्ष्मी- स्वरूपा स्वीक्रियते यतोहि पुत्री सौभाग्यं समृद्धिं च आनयति। किम् अस्मिन् वर्षे वयम् अस्माकं समाजे, ग्रामेषु, नगरेषु च पुत्रीणां सम्मानाय कार्यक्रमान् आयोजयितुं शक्नुम:? सार्वजनिक-कार्यक्रमान् आयोजयितुं शक्नुम:। अस्माकं मध्ये एतादृश्य: पुत्र्य: विद्यन्ते या: निज-परिश्रमेण, निष्ठया, प्रतिभया च, परिवारस्य, समाजस्य, देशस्य च गौरवं सम्वर्धयन्त्य: स्यु: । किम् अस्यां दीपावल्यां भारतस्य अस्या: लक्ष्म्या: सम्मानस्य कार्यक्रमान् वयमायोजयितुं शक्नुम:? अस्मान् पुरत: नैका: पुत्र्य: वध्व: च एतादृश्य: स्यु:, या: असाधारण-कार्याणि कुर्वन्त्य: स्यु:। काश्चन निर्धन-बालानां शिक्षणकार्यम् कुर्वन्त्य: स्यु:। काश्चन स्वच्छतां स्वास्थ्यं चालक्ष्य जागरूकता-प्रचार-कार्येषु निरता: स्यु:, काश्चन चिकित्सकीय-वृत्तिम् अपराः च आभियान्त्रिकीं विधाय समाजस्य सेवायां निरता: स्यु:। काश्चन अधिवक्तृ-पदवीम् अधिगम्य अन्येभ्य: न्याय-प्रदानार्थं प्रयत्नं कुर्वन्त्य: स्यु:। अस्माकं समाज: एतादृशीनां पुत्रीणाम् अभिज्ञानं कुर्यात्, सम्मानं कुर्यात्, विषयेऽस्मिन् च अभिमानं कुर्यात्। तासां सम्मानस्य कार्यक्रमा: सम्पूर्ण-देशे भवेयु:। अपरमेकं कार्यं कर्तुं शक्नुम:, यदेतासां पुत्रीणाम् उपलब्धि-विषये सामाजिक-सञ्चारमाध्यमेषु अधिकाधिकं संविभाजनं प्रचारं च कुर्म:, अथ च #(Hashtag) इत्यस्य प्रयोगं कुर्म: #bharatkilaxmi - भारतस्य लक्ष्मीः । यथा अस्माभिः सम्भूय एकं महाभियानं प्रचालितमासीत्, 'Selfie with daughter'-इति पुत्र्या साकं स्वचित्रमिति। तत् हि सम्पूर्ण-जगति प्रसारितमासीत्। तद्वदेव अधुनापि वयमभियानं चालयाम: 'भारत की लक्ष्मी' इति। भारतस्य लक्ष्म्या: प्रोत्साहनस्य अर्थ: अस्ति यत् देशस्य देशवासिनाञ्च समृद्धे: मार्गस्य च सुदृढीकरणम्।

मम प्रियाः देशवासिन:! 'मन की बात' इति प्रसारणे मया पूर्वमपि प्रोक्तमासीत् यदस्य बृहल्लाभोऽस्ति, अमुना व्याजेन नैकैः परिचितापरिचितैः जनैस्साकं प्रत्यक्ष-परोक्ष-संवादस्य सौभाग्यं प्राप्यते। विगतेषु दिनेषु सुदूरात् अरुणाचलस्य एका छात्रा अलीना-तायङ्गः मह्यं रोचकं पत्रं प्रेषितवती। तस्मिन् पत्रे यत् लिखितं तदहं भवताम् पुरस्तात् पठामि ...

आदरणीय प्रधानमन्त्रि-महोदय,

मम नाम अलीना-तायङ्गः अस्ति । अहम् अरुणाचल-प्रदेशस्य रोईंगक्षेत्रे निवसामि। अस्मिन् वर्षे यदा मम परीक्षा-परिणाम: समागत: तदा मां कतिपय-जनाः पृष्टवन्तः यत् किम् त्वया 'Exam Warriors'- इत्याख्यं पुस्तकं पठितम् ? मयोक्तम् - इदं पुस्तकं तु मया न पठितम्, परं

परावर्त्य मया पुस्तकं क्रीतम्, वारद्वयं त्रिवारं च पठितम्। ततः परं मम अनुभवः समुचितः अवर्तत। मया अनुभूतं यदिदं पुस्तकम् अहं पूर्वम् अपठिष्यं चेत् तर्हि बहुलाभः अभविष्यत् । मह्यं पुस्तकस्य विवध-पक्षाः रोचन्ते। परं मया इदमवलोकितं यत् छात्रेभ्यः तु नैके मन्त्राः सन्ति, परम् पितृभ्याम्, अभिभावकेभ्यः, शिक्षकेभ्यश्च अस्मिन् पुस्तके किमपि नास्ति। अहमिच्छामि यत् यदि भवन्तः पुस्तकस्य नूतन-संस्करणस्य विषये चिन्तयन्तः सन्ति चेत् तस्मिन् पुस्तके पितृभ्याम्, अभिभावकेभ्यः, शिक्षकेभ्यश्च कतिपय-मन्त्रान् विषयवस्तु च संयोजयन्तु इति।"

पश्यन्तु, मम युव-सहयोगिनः अपि विश्वसन्ति यद्देशस्य प्रधानसेवकाय कार्यं दास्यन्ति चेत्, तत् तु भविष्यत्येव।

मम बालवयसः विद्यार्थि-मित्रम्, सर्वादौ, पत्र-लेखनाय भवत्यै धन्यवादः। 'Exam Warriors'- इत्यस्य वारद्वयं त्रिवारं वा पुनरावृत्यै धन्यवादः। पठनावसरे तस्य नैयून्य-विषये माम् सूचयितुं बहुशो धन्यवादः | सहैव मम बालमित्रेण मह्यं कार्यमपि प्रदत्तम्। कार्यादेशः प्रदत्तः। अहं भवतः आज्ञाम् अवश्यमेव पालयिष्यामि। भवत्या यदुक्तं यद् अहं नूतन-संस्करणाय समयं प्राप्स्यामि चेत् तस्मिन् पितृभ्याम् अभिभावकेभ्यः शिक्षकेभ्यश्च किञ्चित् लेखितुं प्रयत्नं करिष्यामि। परमहं सर्वान् निवेदयामि यत् भवन्तः मह्यं साहाय्यं कर्तुं शक्नुवन्ति। दैनन्दिने जीवने भवन्तः किमनुभवन्ति? देशस्य सर्वेभ्यः छात्रेभ्यः, शिक्षकेभ्यः अभिभावकेभ्यः च मम निवेदनमस्ति यत् भवन्तः आपीड-मुक्त-परीक्षया सम्बद्ध-पक्षान् स्वीकृत्य निजानुभवान् मह्यं प्रेषयन्तु, निज-सम्मर्शान् विज्ञापयन्तु, अहं तान् पठित्वा, विचार्य च यत् सम्यक् प्रतीयते तत् निजशब्देषु, निजशैल्या च लेखन-प्रयासं करिष्यामि। यदि भवताम् सम्मर्शाः अधिकमात्रायम् आगमिष्यन्ति चेत् मम पुस्तकस्य नूतन-संस्करणस्य सम्भावना प्रबला भविष्यति। अतोऽहं प्रतीक्षां करिष्यामि – भवतां विचाराणां कृते । अरुणाचलस्य मम बाल-मित्राय छात्रायै अलीना-तायङ्ग - इत्यस्यै पुनरेकवारम् आभारं प्रकटयामि ।

मम प्रियाः देशवासिनः! भवन्तः वार्तापत्राणां, दृश्यप्रसार-वाहिनीनां च माध्यमेन देशस्य प्रधानमन्त्रिणो व्यस्त-कार्यक्रमाणां विषये जानन्ति, व्यस्ततायाः चर्चां कुर्वन्ति, परं भवन्तः जानन्ति एव यदहम् अपि भवादृशः सामान्यो जनः, एकः सामान्यो नागरिकः, अतः एकस्मिन् सामान्य-जीवने वस्तूनां यः यः प्रभावो भवति, सः एव मम मनसि अपि भवति, यतोहि अहमपि भवत्सु एव आगतः। पश्यन्तु, अस्मिन् वर्षे US Open इति स्पर्धायां विजयस्य यावत्यः चर्चाः अवर्तन्त, तावत्यः runner up-Daniil Medvedev- इत्यस्य वक्तव्यस्य अपि अवर्तन्त । सामाजिक-सञ्चार-माध्यमेषु बहु-प्रवर्त्तिताः, अतः मयापि तत् वक्तव्यं श्रुतम्, स्पर्धापि दृष्टा । वयसा त्रयोविंशतिवर्षीयो Daniil Medvedev- तस्य सरलता, अथ च प्रौढता प्रभावप्रदे अवर्तताम्

। अहं तु अवश्यं प्रभावितः। अस्मात् वक्तव्यात् प्रागसौ नवदश-वारं Grand Slam –इत्युपायन-विजेतृणा टेनिस्-स्पर्धायाः शीर्ष-क्रीडकात् Rafael Nadal- इत्यस्मात् निर्णायक-स्पर्धायां पराजितः अवर्तत। अस्मिन् अवसरे अपरः कश्चन अभविष्यत् चेत् औदासीन्यं नैराश्यं च गतः स्यात्, परं तस्य मुखं नावासीदत्, अपितु तेन निज-वक्तव्येन समेषां मुखेषु प्रसन्नता समानीता। तदीयायाः नम्रतायाः, सरलतायाः, वास्तविक-क्रीडक-भावनायाः यत् रूपं अवालोक्यत, प्रत्येकमपि जनः सुतरां प्रभावितः| तस्य वृतानि तत्र स्थितैः दर्शकैः सोत्साहं वर्धापितानि | Danii-लः प्रतिस्पर्धि-क्रीडकं विजेतारं Nada-लम् अपि सुबहु प्राशंसत् l तेनोक्तं यत् केन प्रकारेण Nadaलः लक्षशः यूनः tennis-क्रीडार्थं प्रेरितवान् | युगपदेव, इदमपि प्रावोचत् यत् तेन सह क्रीडनं कियत् कठिनम् आसीत् ? दुर्धर्ष-संघर्षे पराजयानन्तरम् अपि सः स्वीय-प्रतिद्वन्द्विनं Nada-लं प्रशंस्य वास्तविक-क्रीडक-भावनायाः साक्षात् साक्ष्यम् उपस्थापितवान् l यद्यपि अपरत्र विजेता Nada-लः अपि Danii-लस्य क्रीडां भूरिशः प्राशंसत् | एकस्याम् एव स्पर्धायां पराजितस्य उत्साहः विजयिनः च विनम्रता एतद्-द्वयमपि अवलोकनीयम् आसीत् | यदि भवन्तः Daniil Medvedev-स्य अभिभाषणं नैव श्रुतवन्तः, तर्हि अहं भवतः सर्वान्, विशेष-रूपेण च यूनः वक्तुमुत्सहे यत् ते नूनं तस्य इमां दृश्याङ्कन-मुद्रिकाम् अवलोकयेयुः | अस्यां प्रत्येकमपि वर्गस्य वयसः च जनानां कृते सुबहु शिक्षणीयं वर्तते | एतानि तानि क्षणानि भवन्ति, यानि जय-पराजयाभ्याम् उपरि भवन्ति | अत्र जय-पराजयौ नाधिकं महत्वाधायिनौ स्तः | जीवनं नूनं जयति, तथा च, अस्मदीयेषु शास्त्रेषु अतितरां रोचक-रीत्या तथ्यमिदं प्रतिपादितम् | अस्मदीयानां पूर्वजानां चिन्तनं नूनं प्रशंसनीयम् अस्ति | अस्मदीयेषु शास्त्रेषु प्रोक्तम् :-

विद्या-विनयोपेतो हरति न चेतांसि कस्य मनुजस्य |
मणि-काञ्चन-संयोगः जनयति लोकस्य लोचनानन्दम् ||

अर्थात्, यदा कस्मिन्श्चित् जने योग्यता विनम्रता च युगपदेव समाहिते भवतः, तदा सः कस्य न चित्तं हरति? वस्तुतस्तु, अमुना युव-क्रीडकेन अशेष-जगतः जनानां चित्तानि विजितानि |

मम प्रियाः देशवासिनः ! विशेषतश्च मम युव-मित्राणि! यदहं साम्प्रतं सम्भाषे तत् साक्षात् भवतां कल्याणाय एव अस्ति। वादाः विवादास्तु चलिष्यन्ति, पक्षाः विपक्षाश्चापि भविष्यन्ति, परं कतिपय-विषयाः यदि वयं सम्वर्धनात्प्राक् ततः विरमामः चेत्त्तदा बहुकल्याणं भवति। यदा समस्याः अति विस्तारिताः भवन्ति विकटाः वा जायन्ते; तदा तासां निराकरणम् अतिकठिनं परं यदि वयं आरम्भे एव जागृताः भूत्वा तासां निग्रहणं कुर्मः, तदा प्रभूतं रक्षितुं शक्यते। एतेनैव भावेन, अहं चिन्तयामि यद् अद्य विशेषेण स्वीय-युवजनैः साकं किञ्चित् विचारविनिमयं करिष्यामि। वयं सर्वे जानीमः यत् तमाखु-इत्यस्य मदः स्वास्थ्यस्य कृते अतीव हानिकारकः। एतस्य दुरभ्यासस्य मोचनं बहु कठिनं भवति। तमाखू-सेवितारः कर्करोग-मधुमेह-रक्तचाप-

सदृशैः रोगैः अतितरां पीडिताः भवन्ति । एतत् सर्वे कथयन्ति। तमाखोः मदः तस्मिन् उपस्थितेन निकोटीन्-इत्यस्य कारणेन भवति। किशोरावस्थायां एतस्य सेवनेन मस्तिष्कस्य विकासः अपि दुष्प्रभावितः भवति। परम् अहमद्य भवद्भिः साकं नूतन-विषयम् अवलम्ब्य वक्तुमिच्छामि। भवन्तः जानन्ति यत् साम्प्रतमेव भारते ई-सिगरेट-उपरि प्रतिबन्धः आरोपितः। सामान्य- धूम्रदण्डितः पृथक्-ई-सिगरेट् एकम् वैद्युदाण्विकम् उपकरणं भवति। अस्मिन् निकोटीनयुतस्य तरलस्य ऊष्णीकरणेन विशेषविधं रासायनिकं धूम्रं उत्पादयति, यस्य माध्यमेन निकोटीन-इत्यस्य सेवनं क्रियते। सामान्य- सिगरेट्-दुष्प्रभावान् तु वयं सर्वे जानीमः, किन्तु ई-सिगरेट-विषये अलीकाः धारणाः स्थापिताः सन्ति । एवं दुष्प्रचार्यते यत् ई-सिगरेट-सेवनेन काचिदपि हानिः न भवति। अस्मिन् अन्यसिगरेटसदृशं दुर्गन्धं निवारयितुं सुगन्धितानि रसायनानि योजितानि भवन्ति। अस्माभिः स्वीय-परिवेशे दृष्टमस्ति यत् पिता यदि अनवरतं धूम्रपायी अस्ति तदापि असौ परिवारजनान् धूम्रपानात् वारयति। असौ इच्छति यत्तस्य सन्ततयः धूम्रपानस्य अभ्यस्ताः नैव भवेयुः। असौ हि प्रयासं करोति यत् परिवारस्य कोऽपि सदस्यः धूम्रपानं न कुर्यात् । एषः जानाति यत् धूम्रपानेन शरीरस्य महती हानिः भवति। सिगरेट-दुष्प्रभावविषये कोऽपि भ्रमः न अस्ति। एषः दुष्प्रभावकारकः अस्ति -इति विक्रेता जानाति, धूम्रपानकर्ता जानाति, द्रष्टा चापि जानाति। परं ई-सिगरेट-विषयः पूर्णतः भिन्नः अस्ति। ई-सिगरेट-विषये जनेषु एतादृशी जागृतिः नास्ति। ते एतत्संकटं प्रति पूर्णतया अनभिज्ञाः सन्ति। एतेनैव कारणेन कदाचित् कौतूहलवशात् ई-सिगरेट-इति गृहे प्रविशति। यदा कदाचित्तु बालाः परस्परं कौतुकप्रदर्शन-उपालम्भेन एतस्य सेवनं कुर्वन्ति। परिवारेषु पितॄणां समक्षं बालाः कथयन्ति ''यद् पश्यन्तु! अहं अग्निं विना, अग्निशलाकानां प्रयोगं न कृत्वाऽपि धूम्रं उत्पादयामि'' इति। एवं बालाः माया-खेलं कुर्वन्ति, परिवारजनाश्चापि तं दृष्ट्वा करतल-ध्वनिं कुर्वन्ति। एवं एकदा यदि कस्यचित् परिवारस्य बालाः अस्मिन् दुष्चक्रे आपतन्ति, तदा ते शनैः-शनैः अस्य मदस्य अभ्यस्ताः भवन्ति । एवं अस्माकं युवजनाः अनायासेन पथभ्रष्टाः जायन्ते । वस्तुतः ई-सिगरेट-इत्यत्र एतादृशीनि हानिकराणि रसायनानि मिश्रितानि भवन्ति येषां अतीव दुष्प्रभावः स्वास्थ्यस्योपरि आपतति। भवन्तः जानन्ति यदा कोऽपि अस्माकं अन्तिके धूम्रपानं करोति तदा वयं गन्धेन तस्य संज्ञानं कुर्मः। परं ई-सिगरेट्-इत्यनेन साकं एषा स्थितिः न वर्तते । अनेके किशोराः युवजनाश्च अनभिज्ञतया स्वीय-विद्यालये, कार्यालयेषु वा हस्ते स्यूते वा एतत्गृहीत्वा सगर्वं भ्रमन्ति। ते हि शीघ्रमेव एतस्य व्यसनिनः जायन्ते। युवजनाः अस्माकं देशस्य सम्पदारूपाः सन्ति। अस्माभिः ई-सिगरेट-धूम्रवर्तिका प्रतिबन्धीकृता येन प्रमत्ततायाः एषः दुरभ्यासः अस्माकं युवदेशं न नाशयेत्। तेषां परिवारजनानां च आकांक्षाणां खण्डनं न भवेत् । बालानां जीवनं व्यर्थं न भवेत् । एषः रोगः दुरभ्यासश्च अस्माकं समाजे जडतायाः स्थापनं न कुर्यात्। अहं भवतः साग्रहं कथयामि यत् तमाखोः व्यसनं मुञ्चन्तु, ई-सिगरेट्-इत्येतत् प्रति च

कमपि मिथ्याभ्रमं न पालयन्तु। आगच्छन्तु! वयं सर्वे मिलित्वा स्वस्थ-भारतस्य निर्माणं कुर्याम।

अपि भवन्तः ‘फिट् इण्डिया’ इत्येनं  कार्यक्रमं स्मरन्ति। अस्माभिः ध्यातव्यं यत् प्रातः-सायं होराद्वयं व्यायामशालायां गमनेनैव ‘फिट इण्डिया’-कार्यक्रमः सार्थकः न भविष्यति। ‘फिट इण्डिया’ इत्यस्य कृते एतस्याः भ्रान्त-धारणायाः उन्मूलनं अनिवार्यमस्ति। अहं विश्वसिमि यत् भवन्तः मम परामर्शं अन्यथा न अभिज्ञास्यन्ति, सकारात्मकरूपेण गृहीष्यन्ति।

मम प्रियाः भगिन्यः भ्रातारश्च! एषः हि अस्मत्कृते सौभाग्यविषयः यदस्माकं भारतवर्षं एतादृशानां असाधारण-जनानां जन्म-कर्मभूमिश्चाभवत् यैः आत्मनः कृते नैव अपितु अन्येषां कल्याणाय जीवनं अर्पितम्।

एषा अस्माकं भारतमाता, अस्माकं जन्मभूमिः बहुरत्ना वसुंधरा चास्ति। अनेकानि मानव रत्नानि एतया उत्पादितानि सन्ति यैः अन्येषां कृते स्वीयं जीवनं समर्पितं। एतादृशा एका विभूतिः त्रयोदशे ओक्टोबरे वेटिकन नगर्यां सम्मान्यते। एषा हि सर्वेषां भारतीयानां कृते गर्वस्य विषयः यत् आगामिनि त्रयोदशे ओक्टोबरे पोप फ्रांसिसः मरियम थे्रसिया महाभागा ‘सन्त’ इत्युपाधिना अलंकृता करिष्यते । सिस्टर-मरियम-थे्रसिया-महाभागया स्वीय पंचाशत्-वर्षाणां जीवनकाले मानवतायाः कल्याणाय यानि कार्याणि कृतानि तानि अखिल-विश्वस्य कृते दृष्टान्त-रूपाणि सन्ति। समाजसेवा शिक्षायाश्च कृते तस्यां अद्भुतं समर्पणं आसीत्। सा हि अनेकेषां विद्यालयानां, छात्रावासानां अनाथालयानां च स्थापनं कारितवती, आजीवनं च एतस्मिन् संकल्पे संलग्ना आसीत् । सिस्टर-थे्रसिया-महाभागया यदपि कार्यं स्वीकृतं तत् समर्पणभावेन सम्पादितम्। तया ‘कांग्रिगेशन ओफ दि सिस्टर्स ओफ दी होली फैमिली’ इत्येषा संस्था स्थापिता, या  हि अद्यापि तस्याः जीवनदर्शनं संकल्पं च संचालयति। अहं पुनरेकवारं

सिस्टर-मरियम-थ्रेसिया-महाभागां श्रद्धांजलिं अर्पयामि। भारतीयेभ्यः विशेषतश्च ईसाई-भ्रातृ-भगिनिभ्यश्च एतत् उपलब्धिं उपलक्ष्य भूरिशः अभिनन्दनं करोमि।

मम प्रियाः देशवासिनः! न केवलं भारताय अपितु अखिलविश्वाय गर्वास्पदं विषयः अस्ति यत् वयं यदा महात्म- गांधिनः सार्ध-पंच-शती-समारोहं आयोजयामः तदा भारतस्य त्रिंशदुत्तर-एकशतकोटिमितैः नागरिकैः एकलप्रयुक्त-प्लास्टिक-इति घट्यातुतः मुक्तिसंकल्पः अंगीकृतः अस्ति। पर्यावरण संरक्षणाय भारतेन अखिलविश्वे  यावती अग्रगम्या भूमिका प्रदर्शिताऽस्ति तां अभिलक्ष्य अद्य सर्वेषामपि देशानां दृष्टिः भारतस्योपरि केन्द्रिता अस्ति। अहं पूर्णतः विश्वस्तः अस्मि यद्भवन्तः द्वितीये ओक्टोबरे एकलप्रयुक्त-घट्यातु-तः मुक्त्यै आरप्स्यमाणस्य अभियानस्य सहभागिनः भविष्यन्ति। स्थाने-स्थाने जनाः विशिष्टविधासु एतस्मिन् अभियाने योगदानं कुर्वन्ति। परं अस्माकं देशस्य एकेन युवजनेन एकम् अद्वितीयम् अभियानं संचालितम् । तस्योपरि यदा मम अवधानम् आकृष्टम्  तदा अहं दूरभाषेण संभाषणं विधाय एतस्य नवप्रयोगस्य बोधाय प्रयासं कृतवान्। तस्य सूचनाः अन्येषां जनानां कृतेऽपि उपयोगिन्यः भवितुमर्हन्ति। श्रीमान् रिपुदमन-बेल्वी एकं अद्भुतं प्रयासं करोति । एतद्हि ‘प्लोगिंग्’ इतिनाम्ना ज्ञायते। यदाहं प्रथमं वारं प्लोगिंग्-शब्दं अशृण्वं तर्हि मम कृतेऽपि नूतनः एवासीत्। विदेशेषु कदाचित् एषः शब्दः यदा  कदाचित् प्रयुक्तः भवेत् परं भारते तु एषः रिपुदमनबेल्वी-महोदयेन  एव प्रचारितः। आगच्छन्तु, तेन साकं अस्मिन् विषये किंचित् सम्भाषणं कुर्मः ।

मोदिमहोदयः -  हरिः ॐ रिपुदमन-महोदय! नमस्कारः, अहं नरेन्द्रमोदी वदन् अस्मि।
रिपुदमनः  : आम्, महोदय! बहुशो धन्यवादः श्रीमन्!

मोदिमहोदयः  :  रिपुदमन्-महोदय!
रिपुदमनः  :  आम्, श्रीमन्!

मोदिमहोदयः : धावनेन सह स्वच्छीकरणाभियानम् आदाय इयत्समर्पितभावेन कार्यं कुर्वन् अस्ति भवान्।

रिपुदमनः : आम्, महोदय!

मोदिमहोदयः: तावत् मम मनसि जिज्ञासा आसीत्, अतः चिन्तितं मया यत् अहं स्वयमेव दूरभाषं विधाय पृच्छेयं भवन्तम्।

रिपुदमनः : अस्तु।

मोदिमहोदयः : इयं कल्पना कुतः समायाता भवदीयमनसि ?

रिपुदमनः : अस्तु एवं महोदय!

मोदिमहोदयः : अयं शब्दः, अयं प्रकारविशेषः कथं मनसि समायातः।

रिपुदमनः : महाशय! युवभिः अद्यत्वे किमपि आधुनिकं काम्यते, रुचिकरं च किञ्चिद् इष्यते। तान् प्रेरयितुं तु अहं स्वयं प्रेरितः अभवम्। यदि मया 130-कोटि-सङ्ख्याकाः भारतीयाः अभियानेऽस्मिन् योजनीयाः तदा किमपि सुष्ठु किञ्चिद् रुचिकरं च करणीयम् आसीत्। अहं तु स्वयमेव धावकः एकः, अथ प्रभाते यदा वयं धावनं कुर्मः तदा यातायातपरः सम्मर्दः न्यूनः भवति, यदा च जनाः न्यूनाः भवन्ति तदा अवकरः क्षिप्तजातम् अभिघट्यपदार्थश्च सर्वतः आधिक्येन दृष्टिपथे आयाति। अतः तत्स्थितौ अवस्थानं परिदेवनं च अतिरिच्य अहं व्यचिन्तयं यत् एतस्मिन् विषये किमपि कुर्मः, ततः धावनपरेण समूहेन सह दिल्ल्यां प्रारब्धम् अस्माकम् अभियानम्। ततश्च सम्पूर्णेऽपि भारते अयं विषयः नीतः अस्माभिः। एकैकस्थानतः बहुप्राशस्यम् आप्तम् अस्माभिः।

मोदिमहोदयः : वस्तुतः किं करोति स्म भवान्? किञ्चिद् अवबोधयतु येन मम चिन्तनेऽपि विषयः अयम् आगच्छेत् अथ च 'मन की बात' इत्येतत्कार्यक्रममाध्यमेन देशवासिनोऽपि अवगच्छेयुः।

रिपुदमनः : महाशय! तावद् अस्माभिः प्रारब्धमिदम् – धावनेन सह स्वच्छीकरणाभियानम्।
यत्र वयं धावनसमूहान् तदीयश्रमात् परं कथञ्चित् श्रान्तिक्रमे प्रेरितवन्तः यत् भवन्तः अवकराणाम् उत्थानम् आरभन्ताम्, अभिघट्योत्थानं कुर्युः, अनेन धावनमपि भवन्तः कुर्युः स्वच्छीकरणमपि सहैव कुर्युः। अनेन बहुविध-व्यायायामोऽपि युक्तः भवेत्। एवं केवलं धावनं न कुर्युः, भवन्तः अपितु उपवेशनपरम् अधिकोपवेशनपरं ततश्च अग्रे अवनतीभवनं अग्रिमभागस्य बन्धनरूपं च व्यायाममपि साधयेयुः भवन्तः। एवं समग्रव्यायामः सम्पन्नतां नीतः भवेत्।
भवन्तः ज्ञात्वा प्रसन्नाः भवेयुः यत् विगतवर्षे बहुविध-शरीरसौष्ठव-सम्बद्धासु पत्रिकासु भारतस्य शीर्ष-शरीर-सौष्ठव-प्रचलन-रूपेण एतस्य अभियानस्य नामाङ्कनमपि जातम् इमम् आनन्दम्...

मोदिमहोदयः : भवते वर्धापनम् एतदर्थम्।

रिपुदमनः  : धन्यवादः श्रीमन्!

मोदिमहोदयः  : सम्प्रति भवता सेप्टेम्बरमासस्य पञ्चमदिनाङ्कतः कोच्चीनगरात् प्रारम्भः अस्ति विहितः।

रिपुदमनः : आम्, महोदय! एतस्य अभियानस्य नाम अस्ति - '**R|Elan??** Run to make India Litter Free' इति।

यथा भवद्भिः ऑक्टोबरमासिके द्वितीये दिनाङ्के एकम् ऐतिहासिकं निर्णायकमतम् अस्ति प्रदेयम् – अहं च पूर्णतः विश्वसिमि यद् देशः अवकरमुक्तः स्यात् तदा अभिघट्यपदार्थमुक्तः अपि भवेत् अथ च एकं वैयक्तिकम् उत्तरदायित्वम् आयास्यति चेत्, ततश्च सहस्र-किलोमीटर-परिधि-युतानि नगराणि अहं धावनेन सह स्वच्छीकरणाभियान-माध्यमेन अहं संयुक्तः अपि, एवं सर्वैः उक्तं यत् सम्भवतः संसारस्य दीर्घतम-स्वच्छीकरणाभियान-परं धावनम् इदं भवेद् इति। अनेन सहैव महोदय! अस्माभिः बहु अद्यतनं सामाजिकान्तर्जालपटलपरं #(Hashtag) इति प्रयुक्तम्। #PlasticUpvaas इत्येतत् प्रयुक्तमस्ति अस्माभिः।

यत्र वयं जनान् निबोधयामः यत् भवन्तः वदेयुः यत् किमस्ति एकवारमेव उपयोगयोग्यं वस्तु, एकवारमेव प्रयोक्तुं शक्यं यत् किमपि, न केवलम् एकवारमेव प्रयोक्तुं क्षमम् अभिघट्यपदार्थमात्रम् अपितु तथाविधं यत् किमपि यस्योपयोगं भवन्तः स्वजीवने न कुर्युः इति।

मोदिमहोदयः : अहो! शोभनम्... भवान् सेप्टेम्बरमासस्य पञ्चमदिनाङ्कतः निर्गतोऽस्ति, कीदृशः अस्ति अनुभवः भवदीयः साम्प्रतं यावत् ?

रिपुदमनः : महोदय! साम्प्रतं यावत् तु बहुशोभनः अनुभवः वर्तते। विगतवर्षद्वये अस्माभिः पूर्णेऽपि भारते त्रिशत-प्रायिक-धावनपराणि स्वच्छीकरणाभियानानि चालितानि सन्ति। यदा अस्माभिः कोच्चीतः आरब्धं तदा धावनसमूहाः सहभूताः तत्रत्याः स्वच्छता-कर्मचारिणश्च मया सहैव संयोजिताः। कोच्चीतः पश्चात् मदुरैकोयम्बटूरसलेमानाम् अनन्तरम् अधुना अस्माभिः उडुपीस्थाने इदं कृतम्। तत्रत्य-विद्यालयतः आमन्त्रणम् एकम् आगतम्, महाशय! लघु-लघु-बालकाः तृतीयकक्षातः षट्कक्षां यावत् अधीयानास्ते, तेभ्यः अर्धहोरावधिक-कार्यशालायाः अनुभवं प्रदातुम् आहूतः आसम् अहम्, परम् अर्धहोरावधिकी सा कार्यशाला त्रिहोरात्मकं धावनपरं स्वच्छीकरणाभियानरूपम् आप्तवती। महोदय! बालाः एवम् उत्साहिनः आसन् यत् ते इदं कर्तुं समुत्सुकाः नीत्वा च इदं गन्तुमपि तत्पराः आसन्। तैः स्व-स्व-पितरौ संसूचितौ प्रतिवेशिनः सूचिताः, वस्तुतः सर्वोत्कृष्टं प्रेरणास्पदम् इदमेव भवति – अन्य-स्तरं यावत् प्रापणम् इति।

मोदिमहोदयः : रिपुवर्य! परिश्रमः न अपितु साधनाऽस्ति अभियानमिदम्। नूनं भवान् साधनां कुर्वन् वर्तते।

रिपुदमनः  : एवं महोदय!

मोदिमहोदयः : स्व-पक्षतः अहं बहु-धन्यवादान् प्रयच्छामि। परन्तु विचारयतु एवं यत् यदि देशवासिनः भवता त्रि-सङ्ख्याक-सन्देशैः सन्देष्टव्याः, तदा तत् विशिष्टं सन्देश-त्रयं किं भवेत् ?

रिपुदमनः : वस्तुतस्तु अहं चरणत्रय-विषयं ज्ञापयितुम् एष्यामि।

To a litter free India, to a कूड़ा-मुक्त-भारत अर्थात् अवकरमुक्तभारतम्

प्रथमचरणमिदम् – अवकरं अवकरक्षेपस्थाने क्षिपेम।

द्वितीयचरणमिदम् – यदि अवकरं भूमौ पश्यति भवान् तदा अवकरक्षेपस्थाने क्षेप्यः अवकरः।

तृतीयं च चरणमिदम् – यदि अवकर-क्षेपस्थानं न पश्यति भवान् तदा स्व-पार्श्वे अथवा स्वीय-वाहने अवकरं संस्थाप्य गृहं यावत् आनयेत्।

शुष्क-सिक्तावकरयोर्मध्ये भेदः विधेयः ततः प्रातः यदा नगरपालिकायाः वाहनं आयायात् तदा तत्र स्थापनीयास्ते अवकराः। यदि चरणत्रयम् अनुकरिष्यामः वयं तदा अवकर-मुक्तं भारतं वयं द्रक्ष्यामः।

मोदिमहोदयः : पश्यतु रिपुमहोदय! बहुसरल-शब्दैः सर्वं साधारणं विधाय भवता गान्धि-महोदयस्य स्वप्नमेव सहैव आदाय गम्यते। सहैव हि गान्धि-महोदयस्य यः सरल-शब्दैः संवादस्य प्रकारः आसीत् स एव भवता अपि अनुकृतोऽस्ति।

रिपुदमनः : धन्यवादः।

मोदिमहोदयः : अत एव भवान् वर्धापनस्य पात्रमस्ति।

रिपुदमन-वर्य! भवता सह सम्भाषणं विधाय प्रसन्नताम् आप्तवान् अहम् । भवता बहु-नवाचार-भृतेन नयेन विशेषतः नवयुवकाः अपि रुचिमन्तः भवेयुस्तथाविधां शैलीम् अनुसृत्य अयं कार्यक्रमः स्वरूपायितः। अहं पुनः वर्धापयामि भवन्तम्।

मित्राणि! क्रमेऽस्मिन् पूज्य-बापू-वर्यस्य जन्म-जयन्त्यवसरे क्रीडामन्त्रालयोऽपि

'Fit India Plogging Run' इत्येतस्य आयोजनं कर्तुम् अस्ति तत्परः।

ऑक्टूबरमासिके द्वितीये दिनाङ्के द्वि-किलोमीटर-मितं दूरं यावत् धावनपरं स्वच्छीकरणाभियानम्।

निखिलेऽपि देशे इमे कार्यक्रमाः सन्ति भाविनः।

इमे कार्यक्रमाः कथम् आयोज्याः, कार्यक्रमे किं भवति इत्येतत् सर्वं रिपुदमन-वर्यस्य अनुभव-श्रवणेन वयं ज्ञातवन्तः एव।

ऑक्टूबर-मासिकात् द्वितीय-दिनाङ्कात् आरभ्यमाणे अभियानेऽस्मिन् अस्माकं इदमस्ति कर्तव्यं यत् वयं द्वि-किलोमीटर-मितं दूरं यावत् धावनपरं व्यायामं कुर्याम, मार्गे च प्रसृताभिघट्यपदार्थरूपान् अवकरान् संगृह्य स्थापयेम। अनेन न केवलम् अस्माभिः स्वास्थ्य-सन्धारणं विधास्यते अपितु धरित्रीमातुः स्वास्थ्यमपि संरक्षिष्यते। एतेनाभियानेन जनेषु शरीर-

सौष्ठव-रूपस्वास्थ्येन सहैव स्वच्छताविषयिणी अपि जागरूकता वर्धमाना विद्यते। अहं विश्वसिमि यत् 130-कोटिसङ्ख्याकाः देशवासिनः एतस्यां दिशि एकं पदक्षेपं विधास्यन्ति चेत् एकवारमेव प्रयोक्तुं क्षमाद् अभिघट्यपदार्थात् विमुक्तीभवनस्य दिशायां 130कोटिपदसङ्ख्या प्रोत्थिताः भविष्यन्ति।

रिपुदमनमहोदय! पुनरपि एकवारं भवते स्युः बहुशो वर्धापनम्। भवदीय-समूहाय भवदीय-सङ्कल्पनायै च मत्पक्षतः बहुशः धन्यवादः।

मम प्रियाः देशवासिनः, द्वितीय-ओक्टोबरस्य समुपकल्पनानि तु सम्पूर्णेऽपि देशे जगति नैकत्र च प्रचलन्ति, परन्तु वयं, 'गाँधी-सार्ध-शतीम्' कर्तव्यपथि अग्रे नेतुं वाञ्छामः | स्वीयं जीवनं देशहितार्थं परिवर्तयितुं अग्रे गमनार्थम् अभिलषामः | अपरं वृत्तमेकं प्रागेव स्मारयितुं चिन्तयामि | एवं हि, आगामिनि 'मन की बात'-प्रसारणे तत् विस्तरेण नूनं कथयिष्यामि परन्तु अद्याहम् ईषत् प्रागेव एतदर्थं कथयामि येन भवन्तः सन्नद्धतायाः अवसरम् अवाप्नुयुः | भवन्तः स्मरन्ति यत् ओक्टोबर-मासीये एकत्रिंशत्तमे दिने, सरदार-वल्लभभाई-पटेल-महोदयस्य जन्म-जयन्ती वर्तते | 'एकं भारतम् – श्रेष्ठं भारतम्' – इदन्तु अस्मदीयं स्वप्नं, तथा च, एतदर्थम् एव, प्रतिवर्षम् ओक्टोबर-मासीये एकत्रिंशत्तमे दिने, वयं अशेष-देशे, 'Run for Unity'- इति देशस्य एकतायै धावनम् आयोजयामः | आबाल-वृद्धाः, सर्वे जनाः, विद्यालयाः, महाविद्यालयाः, सर्वे, सहस्रशो जनाः, हिन्दुस्थानस्य लक्षशो ग्रामेषु एतस्मिन् दिने देशस्य एकतायै अस्माभिः धावनीयम् | अतः भवन्तः सद्यः सन्नद्धतां कुर्वन्तु | विस्तरेण तु आगामिनि काले अवश्यं कथयिष्यामि परञ्च साम्प्रतं कालावशेषः अस्ति, केचन जनाः अभ्यासम् अपि आरब्धुं शक्नुवन्ति, काञ्चित् योजनामपि कर्तुं शक्नुवन्ति |

मम प्रियाः देशवासिनः, भवन्तः स्मरन्तः स्युः, ओगस्ट-मासे पञ्चदश-दिने अहं रक्त-दुर्गस्य प्राचीराद् अकथयम् यत् द्वाविंशत्युत्तर-द्विसहस्र-तम-वर्ष-पर्यन्तं भवन्तः भारतस्य पञ्चदश-स्थानानि यान्तु | न्यूनात्-न्यूनं पञ्चदश-स्थलानि, तथा च, आनुकूल्ये सति रात्र्येकं रात्रि-द्वयं वा, तत्र वासात्मकं कार्यक्रमं प्रकल्पयन्तु | भवन्तः हिन्दुस्थानम् अवलोकयन्तु, अवगच्छन्तु, अनुभवन्तु च | अस्माकं पार्श्वे कियत्यः विविधताः सन्ति | अपि च, यदा दीपावल्याः समुत्सवावसरे अवकाश-दिनानि आयान्ति, जनाः अवश्यं यान्ति, अतः, पुनः साग्रहं निवेदयामि यत् भारतस्य कानिचिदपि तादृशानि पञ्चदश-स्थलानि पर्यटितुं नूनं गच्छन्तु |

मम प्रियाः देशवासिनः, नातिचिरं परह्यः एव, सप्तविंश-सेप्तेम्बरे विश्व-पर्यटन-दिवसः आमानितः, तथा च, जगतः कानिचित् उत्तरदायीनि अभिकरणानि पर्यटनस्य मानकीकरणमपि कुर्वन्ति, तथा च, भवन्तः एतद् ज्ञात्वा प्रसन्नताम् अनुभविष्यन्ति यत् भारतं यात्रा-पर्यटन-स्पर्धात्मक-सूचीं सुबहु परिष्कृतवत् | एतत् सर्वं भवतां सर्वेषां सहयोगेन शक्यमजायत | विशेषेण

च पर्यटनस्य माहत्म्यस्य अवगमन-कारणात् सञ्जातम् | स्वच्छतायाः अभियानस्यापि एतस्मिन् सुबहु योगदानम् अस्ति | अपि च, परिष्कारोऽयं कियान् अस्ति – भवतः किं कथयेयम् ? भवन्तः नूनं आनन्दम् अनुभविष्यन्ति | साम्प्रतम् अस्मदीयः मानक-स्तरः चतुश्चत्वारिंशत्तमः अस्ति, पञ्च-वर्ष-पूर्वम् अयं पञ्च-षष्टि-तमः आसीत् अर्थात् अन्यतम-प्रकारेण वयं महतीं प्लुतिं कृतवन्तः | यदि अस्माभिः इतः परमपि समधिकाः प्रयासाः अनुष्ठिताः चेत् स्वाधीनतायाः पञ्च-सप्तति-वर्ष-पूर्तेः आगमनावधौ, वयं पर्यटन-क्षेत्रे विश्वस्य प्रमुख-स्थानेषु स्वीयं गौरव-पूर्णं स्थानं प्रतिष्ठापयितुं शक्ष्यामः |

मम प्रियाः देशवासिनः, भवद्भ्यः सर्वेभ्यः पुनरेक-वारं विविधता-सम्भरितस्य भारतस्य विविधानाम् उत्सवानां कृते भूरि भूरि शुभकामनाः | अस्तु! इदमपि नूनम् अवधेयं यत्, यत् दीपावली-पर्वणि आग्नेय-क्रीडनकेभ्यः कुत्रचिदपि अग्नि-काण्डादिकं, वा कस्यचित् काचिदपि हानिः नैव स्यात् | एतदर्थं यत्किमपि निवारणादिकम् अङ्गीकर्तव्यं भवति, भवन्तः अवश्यं तद् परिपालयन्तु | प्रसन्नतापि स्यात्, आनन्दोऽपि भवेत्, उत्साहः अपि भवितव्यः, तथा च, अस्मदीयाः एते उत्सवाः सामूहिकतायाः सुगन्धमपि आनयन्ति, सामूहिकतायाः संस्कारान् अपि आनयन्ति | सामूहिक-जीवनमेव अभिनवं सामर्थ्यं ददाति | तस्य नूतनस्य सामर्थ्यस्य साधनायाः आधानमस्ति – उत्सवः | आगच्छन्तु! मिलित्वा सोल्लासं, सोत्साहं, नवीनेन स्वप्नेन, नूतनेन च संकल्पेन साकं वयं उत्सवान् अपि आयोजयेम | पुनरेकवारं, भूयस्यः शुभकामनाः | धन्यवादः |

**********

- भाषान्तरम् - सर्वश्री-श्रुतिकान्तपाण्डेय-नारायणदत्तमिश्र-पुरुषोत्तमशर्मभिः सम्भूय डॉ.बलदेवानन्द-सागरः

--- भाषान्तर-कर्ता - डॉ.बलदेवानन्द-सागरः

दूरभाषः - ९८१० ५६२२ ७७

अणुप्रैषः - baldevanand.sagar@gmail.com